# Shri Someshvara Panchaka Stotram

# શ્રીસોમેશ્વરપઞ્ચકસ્તોત્રમ્

## Document Information

Text title : Shri Someshvara Panchaka Stotram

File name : someshvarapanchakastotram.itx

Category : shiva, shrIdharasvAmI, panchaka, stotra

Location : doc_shiva

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

Shri Someshvara Panchaka Stotram

# શ્રીસોમેશ્વરપઞ્ચકસ્તોત્રમ્

(શાર્દૂલવિક્રીડિતમ્)

વિશ્વં યત્ર ભવેદ્વિલીનમખિલં તલ્લિઙ્ગમસ્મિન્ સદા
સત્યં જ્ઞાનમનન્તમદ્વયમહો બ્રહ્મ સ્ફુટં દૃશ્યતે ।
પઞ્ચબ્રહ્મસુલક્ષણાનિ હિ મુખૈર્યઃ પઞ્ચભિર્દર્શયન્
આસ્તે સોમપુરે સુધર્મવૃષભારૂઢસ્તમીશં ભજે ॥ ૧॥

નિત્યં યત્પરિપૂર્ણલક્ષણમિદં હ્યાગન્તુકં ન સ્વકં
મત્વૈવં દ્વિમુખં ન દર્શયતિ નો મન્યે સ્ફુટં શઙ્કરમ્ ।
સત્યજ્ઞાનસુખં મુખત્રયમિદં ભક્તેષુ સન્દર્શયન્
આસ્તે સોમપુરે સુધર્મવૃષભારૂઢસ્તમીશં ભજે ॥ ૨॥

આશ્ચર્યં સુમનોહરં વિલસિતં લિઙ્ગે સુમૂર્તિસ્તુ યા
કેનેયં ઘટિતા નરેણ ન ભવેદીશો હિ તત્કારણમ્ ।
લિઙ્ગેઽહં સતતં વસામિ સકલાનેતદ્ધિ સમ્બોધયન્
આસ્તે સોમપુરે સુધર્મવૃષભારૂઢસ્તમીશં ભજે ॥ ૩॥

ભક્તાનુગ્રહહેતુનૈવ ખલુ યોઽરૂપઃ સરૂપોઽભવત્
ભક્તોદ્ધાર ઇતીહ યસ્ય સતતં જાગર્તિ કીર્તિર્ભુવિ ।
ભક્તિપ્રીતિમનિન્દિતાં હૃદિગતાં સ્પષ્ટં પ્રકુર્વંશ્ચ યઃ
આસ્તે સોમપુરે સુધર્મવૃષભારૂઢસ્તમીશં ભજે ॥ ૪॥

પ્રત્યગ્રૂપતયા ચકાસ્તિ સતતં મદ્રૂપમેતત્પરં
મત્વા પશ્ચિમદિઙ્મુખોઽત્ર હિ શિવો મન્યે સ્વયં કેવલઃ ।
યોગારૂઢવપુઃ સ્વરૂપમમલં ચિન્મુદ્રયા ચાદિશન્
આસ્તે સોમપુરે સુધર્મવૃષભારૂઢસ્તમીશં ભજે ॥ ૫॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતં શ્રીસોમેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।
રચનાસ્થાનં - સોમપુર, ભદ્રાવતિ નિકટં, સંવત્સરઃ - ૧૯૩૮

Proofread by Manish Gavkar

*Shri Someshvara Panchaka Stotram*

pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*